श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्री मुक्कूर् लक्ष्मीनृसिंहस्वामिना अनुगृहीतं

# ॥ श्री नङ्गैनल्लूर् मङ्गळम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री नङ्गैनल्लूर् मङ्गळम् ॥

नङ्गैनल्लूर् अग्रहारे नतानां फलमद्भुतम्।
दृश्यते भद्रया भद्रो यज्ञेशो नृहरिः परः ॥ 1 ॥

नङ्गैनल्लूर् निवासाय तुङ्ग मङ्गळ रूपिणे।
गङ्गा सलिल पादाय श्री नृसिंहाय मङ्गळम् ॥ 2 ॥

नवनीताय कृष्णाय नवमोहन रूपिणे।
नङ्गैनल्लूर् निवासाय श्री नृसिंहाय मङ्गळम् ॥ 3 ॥

रामाय रामभद्राय रमालोलाय धीमते।
नङ्गैनल्लूर् निवासाय श्री नृसिंहाय मङ्गळम् ॥ 4 ॥

श्रीनिवासाय निधये श्रीधराय महात्मने।
नङ्गैनल्लूर् निवासाय श्री नृसिंहाय मङ्गळम् ॥ 5 ॥

सुदर्शनाय देवाय सुप्रसन्नाय चक्रिणे।
नङ्गैनल्लूर् निवासाय श्री नृसिंहाय मङ्गळम् ॥ 6 ॥

षण्णवती महायज्ञे शोभिताय गुणात्मने।
नङ्गैनल्लूर् निवासाय श्री नृसिंहाय मङ्गळम् ॥ 7 ॥

धनुर्धराय देवाय धीराय परमात्मने।
नङ्गैनल्लूर् निवासाय श्री नृसिंहाय मङ्गळम् ॥ 8 ॥

नारायण यतीन्द्रेण अर्चिताय स्थिराय च।
नङ्गैनल्लूर् निवासाय श्री नृसिंहाय मङ्गळम्॥ 9॥

मट्टपल्लि श्रीनृसिंह प्रियाय परमात्मने।
नङ्गैनल्लूर् निवासाय श्री नृसिंहाय मङ्गळम्॥ 10॥

मङ्गळगिरि नाथाय वेदाद्रि पुर वासिने।
नङ्गैनल्लूर् निवासाय श्री नृसिंहाय मङ्गळम्॥ 11॥

घटिकाचलान्तर्वेद्याम् सुस्थिराय वराय च।
नङ्गैनल्लूर् निवासाय श्री नृसिंहाय मङ्गळम्॥ 12॥

हृषीकेश यादगिर्यां शोभनाद्रि निवासिने।
नङ्गैनल्लूर् निवासाय श्री नृसिंहाय मङ्गळम्॥ 13॥

श्री मट्टपल्लि नाथाय नैमिशारण्य रूपिणे।
नङ्गैनल्लूर् निवासाय श्री नृसिंहाय मङ्गळम्॥ 14॥

दीपालयाय देवाय सिंहाचल निवासिने।
नङ्गैनल्लूर् निवासाय श्री नृसिंहाय मङ्गळम्॥ 15॥

बृन्दावन विहाराय श्रीरङ्गपुर शायिने।
नङ्गैनल्लूर् निवासाय श्री नृसिंहाय मङ्गळम्॥ 16॥

मट्टपल्ल्यान् नङ्गैनल्लूर् आगताय स्थिराय च।
नङ्गैनल्लूर् निवासाय श्री नृसिंहाय मङ्गळम्॥ 17॥

मुक्कूर् नृसिंहदासेन जयमङ्गळमद्भुतम्।
नारायण योगिवर्य कृपया प्रोक्तमव्ययम्॥ 18॥

॥ श्री नङ्गैनल्लूर् मङ्गळं समाप्तम् ॥